International Journal of Sanskrit Research 2016; 2(6): 82-84

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2016; 2(6): 82-84
© 2016 IJSR
www.anantaajournal.com
Received: 20-09-2016
Accepted: 21-10-2016

**अमित सेमवाल**
शोधच्छात्रः संस्कृत विभागः हे.न.ब.ग. वि.वि. टिहरी गढ़वाल

**Correspondence**
**अमित सेमवाल**
शोधच्छात्रः संस्कृत विभागः हे.न.ब.ग. वि.वि. टिहरी गढ़वाल

# पुराणेषु पर्यावरणविज्ञानम्

## अमित सेमवाल

संस्कृत भाषा अतिप्राचीना समृद्धा वैज्ञानिकी चास्ति। संस्कृतभाषायां वेद–वेदांगेषु, पुराणेषु, दार्शनिकग्रन्थेषु, धर्मशास्त्रादिषु च न केवलं धार्मिकं तात्त्विकं च चिन्तनम् उपलभ्यते अपितु मानवहिताय वैज्ञानिकचिन्तनमपि पदे–पदे प्राप्यते। गणित–ज्योतिष्– रसायन– भौतिकी– खगोलविज्ञान – आयुर्वेद – वास्तुविज्ञान – कृषिविज्ञान – पर्यावरणविज्ञानादीनां प्रभूतं ज्ञानम् अस्माकं संस्कृत वाङ्मयेषु सन्निहितं वर्तते। वेदेषु इदं ज्ञानं सूत्ररूपेण विद्यते किन्तु पुराणेषु एतस्य ज्ञानस्य व्याख्याविस्तृत रूपेण विद्यते। वेदेषु यानि तत्वानि वर्ण्यन्ते तेषां विशदीकरणं पुराणेषु आख्यानरूपेण प्राप्यते अर्थात् वेदोक्तार्थस्य ज्ञानं सरलं सुलभं च कर्तुं पुराणानि विरच्यन्ते स्म। यथोक्तं महाभारते–

> इतिहासपुराणाभ्यां वेदं समुपवृंहयेत्।
> विभेत्यल्पश्रुतोद्वेदो मामयं प्रहरिष्यति।।[1]

संस्कृत साहित्ये पुराणानामतीव गौरवास्पदं स्थानं विद्यते। पुराणसंख्याविषये मतभेदो नास्ति, सर्वसिद्धं तेषां अष्टादशत्वम्। तद्यथा–

> मद्वयं भद्वयं चैव ब्रत्रयं वचतुष्टयम्।
> अनापलिंगकूस्कानि पुराणानि प्रचक्षते।।[2]

पुराणेषु प्राचीनभारतस्येतिहासो निहितः। समाजस्य तात्कालिकस्वरूपबोधनायापि पुराणानां महानुपयोगः। पुराणेषु भूत–वर्तमाना–भाविनश्चार्थाः वर्ण्यन्ते। सर्गः सृष्टिः प्रतिसर्गः सृष्टेलयः पुनश्च सृष्टिः वंशः सृष्टयारम्भे वंशावली मन्वन्तराणि के–के मानवाः कदा अजायन्तेति वर्णनम्, वंशानुचरितं सूर्यचद्रवंशयोर्विशिष्टवर्णनम् इदं वस्तुपंचकं पुराणेष्वपेक्ष्यते–

> सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च।
> वंशानुचरितं चैव पुराणं पंचलक्षणम्।।[3]

पुराणेषु सृष्टि–स्थिति–प्रलयवर्णनम्, पर्यावरणवर्णनं, प्रकृतिवर्णनं, तीर्थादिवर्णनं, वृक्षवनस्पतिवर्णनं च विशेषरूपेण वर्णितमस्ति। पुराणेषु पर्यावरणसंरक्षणार्थमपि स्थाने–स्थाने प्रेरणा प्रदत्ता तदर्थमुपायश्च वर्णिताः। पर्यावरणं हि सर्वेषां प्राणीनां जीवनस्याधारभूतम्। विश्वेऽस्मिन् सर्वे प्राणिनः पृथिवीं जलं वायुं च आश्रित्यैव प्राणवन्तो भवन्ति जीवन्ति च। अतएव पर्यावरणसंरक्षणम् अनिवार्यमेवास्ति। पृथिवी–जल–वाय प्रभृतीनां प्रदूषणात् संरक्षणं प्राणीनां हिताय तथा च तेषां सदुपयोग एव वस्तुतः पर्यावरण संरक्षणम्। अथर्ववेदे पर्यावरण संरक्षणतत्त्वेषु जलं वायुः वनस्पतयः(पृथिवी) तत्वत्रयं एव प्रमुखं मन्यन्ते–

---

[1]महाभारत–1/1/14
[2]मद्वयम्– 1 मत्स्यपुराण 2 मार्कण्डेयपुराण
भद्वयम्– 3 भागवतपुराण 4 भविष्यपुराण
ब्रत्रयम्– 5 ब्रह्माण्डपुराण 6 ब्रह्मवैवर्तपुराण 7 ब्रह्मपुराण
वचतुष्टयम्–8 वराहपुराण 9 वामनपुराण 10 वायुपुराण 11 विष्णुपुराण
12 अ– अग्निपुराण, 13 ना–नारदपुराण, 14 प– पद्मपुराण, 15 लि–लिंगपुराण, 16 ग–गरुडपुराण, 17 कू–कूर्मपुराण, 18 स्क–स्कन्दपुराण
[3]विष्णुपुराण–6/8/2

त्रीणि छन्दासि कवयो वि येतिरे पुरुरुपं दर्शतं विश्वचक्षणम्।
आपो वाता औषधयः तान्येकस्मिन् भुवन अर्पितानि।।[4]

परितः आवृणोति आच्छादयति सर्वान् अस्मान् यत् तत् पर्यावरणम्। विशिष्टं ज्ञानं तु विज्ञानं इत्युक्त्यनुसारे पर्यावरणविषये यद् विशिष्टं ज्ञानं वर्तते तत्तु पर्यावरणविज्ञानम्। पर्यावरण सन्दर्भे पुराणेषु किं विशिष्टं ज्ञानम् ? एतस्य उदघाटनमेव मम् शोधपत्रविषयः।
ये पदार्थाः मानवं परितः आच्छायन्ति मानवजीवनं च प्रभावयन्ति ते पर्यावरण शब्देन गृहयन्ते। पर्यावरण शब्दः परि+आ+वृ+ल्युट इति योगेन निष्पन्न भवति। यमाश्रित्य जीवाः परोक्ष–प्रत्यक्षरूपेण प्रभाविताः भवन्ति, तदेव पर्यावरणम्। पृथिवी, वायुः, जलम्, आकाशः, प्रकाशः, वनस्पतयः, पशुपक्षिणः इत्यादयः पर्यावरणस्य प्रमुखानि अंगानि सन्ति। प्रकृतिरेव पर्यावरणस्य संवाहिका संरक्षिका च विद्यते। प्रकृतिः प्रतिक्षणं मानवस्य हित सम्पादने निरता। अतः पर्यावरण संरक्षणाय प्रकृतिमानवयोः पारस्परिकं सन्तुलनम् अनिवार्यम्। प्रकृतौ परिव्याप्तानि पंचमहाभूतानि मानवशरीरे अपि सन्निहितानिः अर्थात् प्रकृत्यां परिव्याप्तैः पंचमहाभूतैः एव मानवशरीरं विनिर्मितम् तद्यथा–

क्षितिर्वारि हविर्भोक्ता वायुराकाश एव च।
स्थूलभूता इमे प्रोक्ताः पिडोऽयं पंच भौतिकः।।[5]

अस्मान् परितः यानि पंचमहाभूतानि सन्ति तेषां समवायः एव पर्यावरण इति पदने व्याह्रयते। शुद्धं वायुं,शुद्धं जलं, शुद्धां पृथिवीं विना मानवजीवनस्य कल्पना अपि न कर्तुं शक्यते। प्रकृतिं विना मानवजीवनं दुष्करमेव अयं तु प्राचीन भारतीय ऋषिभिः मनीषिभिश्च पूर्वमेव ज्ञातम्। अतएव तैः प्राकृतिकतत्त्वानां देवतास्वरूपेण स्तुतयः कृताः–

भूमिरापोऽनलो वायुर्व्योमांहकार एव च।
यस्य रूपं नमस्यामि भवन्तं ब्रह्मसंज्ञितम्।।[6]

ये तत्त्वाः प्रकृतेः विद्यमानाः सन्ति, ते सर्वे देवतास्वरूपेण पुराणेषु वर्णितमस्ति। पर्यावरण तत्त्वेषु जलस्य वायोः पृथिव्याः वनस्पतेश्च महत्त्वपूर्णं स्थानम्। पुराणेषु पर्यावरण संरक्षणार्थमेव जले नदीषु च देवतानां वासस्थानं कथितम्। परब्रह्मणो नारायणस्य इति नाम करणे जलमेव कारणम्–

अपो नारा इति प्रोक्ता आपो वै नरसूनवः।
अयनं तस्य ताः पूर्वं तेन नारायणः स्मृतः।।[7]

प्रकृति प्रदत्त साधनेषु जलं महत्त्वपूर्णं साधनम्। जीवनाय जलं आवश्यकं वर्तते। अस्माकं सौभाग्यमस्ति यत् पृथिवी जलीय ग्रह वर्तते। जलं विना जीवनं दुष्करमेव सर्वेषां जीवजन्तुनाम्। अतः जलस्य संरक्षणम् अस्माकं कर्त्तव्यमस्ति। जले संसारस्य उदभवः महाप्रलय जले एव निमज्जति संसारः। जलमेव जगतः प्राणः। बहुनात्र किमुक्तेन सम्पूर्ण चराचर जगतं जले एव आश्रिताः–

प्राणो वै जगतमापो भूतानि भुवनानि च।
बहुनात्र किमुक्तेन चराचरमिदं जलम्।।[8]

अद्यत्वे जलप्रदूषणं सर्वत्र एव दृश्यते। जलप्रदूषणस्य कारणं मनुष्यमेव। गंगा –यमुना–सदृशीषु नदीषु तदीयतटस्थनगराणां मलमूत्रादिकं सर्वप्रकारकं मालिन्यं नदीषु निपत्याते। औद्योगिकं विषमयरसायनदूषितजलमपि तासु निपात्यते। नराणां पशूनां च शवास्तत्र प्रवाह्यन्ते। तथाविधं जलं मानवानां स्नानपानादिजनितं रोगमेव प्रकुरुते। औद्योगिकेभ्यः अकार्वणिक–फ्लोराइड–शीशा–पारा इत्यादियुक्तैः प्रवाहितैः जलैः ह्रदयरोग–रक्ताल्पता–अङ्गानां वक्रता–उदररोगाश्च भवन्ति। मलमूत्रविसर्जन सन्दर्भे पुराणेषु वर्णितमस्ति यत् ये मानवाः मलमूत्रं जले, मार्गे, गोशालायां वा निक्षिप्यन्ते ते नरकलाके गच्छन्ति–

ये शरीरं मलं बहौ प्रक्षिपति जलेऽपि च।
आरामे पथि गोष्ठेवा ते वै नरक गामिनः।।[9]

याज्ञिक क्रियादिभिः कूपतडागादीनां स्थापन व्यवस्था पुराणेषु प्राप्यते तद्यथा अग्निपुराणे–[10]

विष्णुं वरुणं च सम्पूज्य जलाशयनिर्माणं कारयेत।।

वायुः प्राणीनां प्राणधारकः। श्वसन माध्यमेन मानवाः आक्सीजननामकं प्राणवायुं गृह्वान्ति येन मानवाः जीविताः। अतएव चरकसंहितायां वायुः ईश्वर रूपेण वर्णितमस्ति–

वायुरायुर्बल वायुर्कयुर्धाता शरीरिणाम्।
वायुर्विश्वमिदं सर्वं प्रभुर्वायुश्च कीर्तितः।।[11]

इयं पृथिवी सर्वतः वायुमण्डलेनावृता। न केवल पृथिवी तले अपितु जलेऽपि वनस्पति–जीवजन्तुनां स्थितिर्विकासश्च वायुमण्डल प्रभावेनैव भवति। वायु संरचनायाः प्रमुख घटकरूपाः नाइटोजन–आक्सीजन–कार्बनडाई–आक्साइड–आर्गनादयः सन्ति। वायुः मानवजीवनस्य प्राणतत्वमस्ति। जीवनरक्षणाय श्वासोच्छवाकारणात् वायुमण्डलस्य शुद्धीकरणस्य शास्त्रीय व्यवस्था पुराणेषु विद्यते। इदमेव कारणं यत् पुराणेषु वायुसंशोधनार्थं होमस्य विधानं कृतम्। होमः वायुमण्डलं परिशुद्धं करोति, रोगेभ्यः मुक्तिं ददाति।
पृथिवी जीवयुक्तग्रहः। यावत् दूरं सूर्यचन्द्रमसोः प्रकाशः गच्छति समुदप्रर्वतादि युक्तं प्रदेशं तावत् प्रदेशं पृथिवी इति नाम्ना ज्ञायते तथाच सुन्दरं वनं नद्याः रमणीय सरोवरः पुस्कोकिलं मनोहारी आकाशं च विद्यते सा एव पृथिवी–

रविचन्द्रमसोर्यावन्मयूखैरवभास्यते।
समुन्द्रसरिच्छैला तावती पृथिवी स्मृता।।[12]
वनानि नद्यो रम्याणि सरासिं कमलाकराः।
पुंस्कोकिलाभिलापाश्च मनोज्ञान्यम्बराणि च।।[13]

जैवविविधताः पृथिव्याः ख्यातिः। अथर्ववेदे "माता भूमिः पुत्रोऽहं पृथिव्याः" इति कथयित्वा मानवं पृथिवीं पुत्ररुपेण स्वीकृतम्। पुत्रं प्रति मातुः दायित्वं पृथिवी सम्पादयति सा हि पाल्यते पोष्यते च। पृथिवी अन्नादि पदार्थेभ्यः वृक्षोत्पादित फलेभ्यः प्राणवायु प्रदाय जीवान् रक्षति–

भूमे मातर्नि धेहि मा भद्रया सप्रतिष्ठितम्।[14]

---

[4]अथर्ववेद 18/1/17
[5]गरुड.पुराण 25
[6]कूर्मपुराण 10/26 तथा
भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च।
भूतादि प्रकृतिर्यस्य रुपं नतोऽस्मि तम्।। विष्णुपु0 1/12/51
[7]विष्णुपुराण 1/4/6 तथा
अपो नारा इति प्रोक्ता नाम पूर्वमिति श्रुतिः।
अयनं तस्य ताः यस्मात् तेन नारायणः स्मृत।। कूर्मपू0 6/5
[8] लिंगपु0 35/13

[9] गरुणपु0 4/42
[10] अग्निपु0 282
[11] चं0सं0 28/3
[12]विष्णुपु0 2/7/3
[13]वही 2/5/10
[14]अथर्ववेद 12/2/63

मानव शरीरे त्वचा–अस्थि–नाड्य–रोमादयः पृथिव्याः गुणाः एव सन्ति–

त्वगस्थिनाड्या रोमाणि मांस चैव रवगेश्वर।
एते पंचगुणा भूमेर्मया ते परिकीर्तिताः।।[15]

पर्यावरणरक्षा विश्वस्य महती समस्या। पर्यावरण विशेषज्ञानुसारं वृक्षाः वनस्पतयश्च पर्यावरण सुरक्षायै सर्वाधिकम् उपयोगिनः। वृक्षवनस्पतयः वायुमण्डलस्य सन्तुलनाय सहायका भवति। मानव सहितानां समेषां जीवानां जीवनोपयोगी भोजनतत्त्व प्राप्तेः मूलस्रोतः वनस्पतयः एव। शाकाहारी जीवाः प्रत्यक्षतः मांसाहारिणश्च अप्रत्यक्षतः वनस्पति समूहैरेव प्राप्यन्ते। वनस्पतिकी आर्द्रता वर्षायै अनुकूला। वनस्पतयः भूमे अन्तः स्रवण क्षमता वर्द्धयति। येन मृदीयार्द्रतायाः रक्षा भूगर्भीय जलभण्डारवृद्धिश्च संभाव्यते। वनस्पति मृदा संरक्षणस्य प्रभावशाली उपायभूता। प्राचीनकाले वृक्षवनस्पतिनां एतादृशं ज्ञानम् आसीत्। अतएव पुराणेषु वृक्षवनस्पतयःदेववत् पूज्याः पुत्रवत् च पालनीयाः मन्यन्ते–

आदौ सर्व वृक्षमयं पूर्व विश्वमजायत।
एतेवृक्षाः महाश्रेष्ठाः सर्वे देवांशसम्भवा।।[16]

वृक्षेषु सर्वेषां देवानां वासः इति पुराणेषु मन्यन्ते। अग्निपुराणस्य सप्ततितमेऽध्याये पादपप्रतिष्ठाप्रकरणे प्राप्यते यत् वृक्षाणां प्रतिष्ठया पापनाशः परासिद्धिश्च भवति। अशीतितमेऽध्याये दमनकारोहणविधिः प्राप्यते। अत्र रुद्रोदभूत भैरवस्य वासः परिकल्पितः। मत्स्य पुराणे वर्णितमस्ति यत् एकः वृक्षः दशपुत्रान् समतुल्य भवति। तद्यथा–

दशकूपसमः वापी दशवापी समो ह्रदः।
दशह्रदसमः पुत्रो दशपुत्रसमो द्रुमः।।[17]

अश्वत्थवृक्षस्य (पीपल) महत्वं न केवलं धार्मिक दृष्ट्या अपितु वैज्ञानिक दृष्ट्या अपि वर्तते। एषः वृक्षः सर्वाधिकं आक्सीजनमुत्सर्जनं करोति। अतएव ब्रह्मवैवर्तपुराणे लिखितमस्ति यत् ये मनुष्याः अश्वत्थः वृक्षं आरोपन्ति ते सहस्र वर्षपर्यन्तं तपोलोके निवसन्ति–

अश्वत्थवृक्षमारोप्य प्रतिष्ठां च करोति यः।
स याति तपसो लोकं वर्षाणामयुतं परम्।।[18]

गीतायां भगवता कृष्णेन "अश्वत्थः सर्ववृक्षाणा" [19] इति उक्त्वा अश्वत्थवृक्षस्य उत्कृष्टता प्रतिपादिता। प्रकृतिं प्रति हिसायाः दुष्परिणामः अपि पुराणेषु वर्णितमस्ति। तद्यथा अग्निपुराणे–

क्रियते पत्रविच्छेदः सपुष्पफलानिस्तपे।
अनावृष्टिभयं धोरं तस्मिन् देशे प्रजायते।।[20]

अनेन कथनेन सिद्धयते यत् प्रकृतिं प्रति हिंसायाः दुष्परिणामः मानवस्य अकल्याणाय भवति। पंचतत्रेऽपि उद्धोषितम् यत् यः मानवः प्राकृतिक तत्वानि हन्ति सः निर्घृण धोरं नरकं याति–

हिंसकान्यपि भूतानि यो हिनस्ति स निर्घृणः।
स याति नरकं धोरं..................................।।

अद्यत्वे पर्यावरण संरक्षणस्य चिन्ता सर्वत्र अतीव तीव्रा दृश्यते। स्वच्छं पर्यावरणं मानवजीवनाय अपेक्षितं भवति। प्रदूषितं पर्यावरणं विनाशाय कल्पते। अद्य प्राय लोभैषणा वर्धते। मर्यादा भज्यन्ते नाद्रियते प्राकृतिक जीवनं च। अस्मात् कारणात् विश्वे पर्यावरण संरक्षणस्य विकटसमस्या जाताः। पुराणेषु अस्याः समस्यायाः निराकरणं वर्तते। तत्र सर्वेषां प्राकृतिक तत्त्वानां देवतास्वरूपेण स्तुतयः कृताः। कारणं भारतदेशोऽयम् आध्यात्मप्रधानदेशः। यदि वयं पर्यावरणसंरक्षणे सावधानाः भवेम तदैव अस्माकं जीवनं शान्तिमयं सुखमयं च भवितुं शक्नोति। अस्माकं मानसिकविकृतिकारणात् पर्यावरणस्य हानि भवति। अतएव सर्वप्रथम अस्माभिः मनः शुद्धं कर्त्तव्यम्। यदि मनः निर्मलं भविष्यति, तदैव अस्माकं विचाराः शुद्धा, चिन्तनं शुद्धं च भविष्यति येन पर्यावरणस्य विशुद्धिः अवश्यमेव भविष्यति। तदेव कारणं यत् ऋषयः सततं कामयन्ते स्म–

यतो यतः समीहसे ततो नो अभयं कुरु।
शन्नः कुरु प्रजाभ्यः अभयं नो पशुभ्यः।।[21]

## सन्दर्भ–ग्रन्थसूची


1. श्रीविष्णुपुराणम्, आचार्य शिवप्रसाद द्विवेदी, चौखम्बा सुरभारती प्रकाशन वाराणसी, 2012
2. गरुडपुराणम्, डॉ0 रामशंकरभट्टाचार्य,चौखम्बा संस्कृत संस्थान वाराणसी,वि.स. 2055
3. ब्रह्मवैवर्तपुराण, तारिणीश झा, हिन्दी साहित्य सम्मेलन प्रयाग,1981
4. अग्निपुराण, आचार्य शिवप्रसाद द्विवेदी, चौखम्बा सुरभारती प्रकाशन वाराणसी,
5. कूर्मपुराण, आनन्द स्वरूप गुप्त, सर्वभारती प्रकाशन वाराणसी 1972
6. महाभरत, स्वामी जगदीश्वरानन्द सरस्वती, हंसानन्द प्रकाशन दिल्ली,2008
7. संस्कृत साहित्ये पर्यावरणसमीक्षणम्, डॉ सुशान्तकुमार ठाकुर, कला प्रकाशन वाराणसी,2008
8. चरकसंहिता, डॉ0 ब्रह्मानन्द त्रिपाठी, चौखम्बा सुरभारती प्रकाशन वाराणसी,
9. विष्णुशर्माकृतपंचतन्त्र,श्रीबालशास्त्री, चौखम्बा सुरभारती प्रकाशन वाराणसी
10. यजुर्वेद, पं. रामशर्मा आचार्य, युगनिर्माण योजनाविस्तार ट्रस्ट विस्तार मथुरा, 2012
11. अथर्ववेद, पं. रामशर्मा आचार्य, युगनिर्माण योजनाविस्तार ट्रस्ट विस्तार मथुरा, 2014
12. श्रीमद्भगवद्गीता, डॉ. राजेश्वरशास्त्री मुसलगाँवकंर चौखम्बासंस्कृत संस्थान वाराणसी, 2013
13. मत्स्यपुराण, वासुदेव शरण अग्रवाल, ऑल इण्डिया काशीराज न्यास ट्रस्ट वाराणसी, 1963
14. स्कन्दपुराण, पुष्पेन्द्र कुमार,नाग पब्लिशर्स दिल्ली,1984
15. लिंगपुराण, मनसुखराय मोर, गुरूमण्डल ग्रन्थमाला कलकत्ता,1960


[15] गरुडपु0 26
[16] स्कन्दपु0 6/247/21
[17] मत्स्यपुराण 153/12
[18] -ब्रह्मवैवर्तपुराण 58/9
[19] -श्रीमद्भगवत्गीता 10/26
[20] -अग्निपुराण 248
[21] -यजुर्वेद 36/22